## अष्टमप्रकरणम् - भाषाद्वयोत्तरम्

किं तृष्णाशमनं स्त्रीभिः किं कृत्वा बध्यते कचः ।
गीर्वाणद्राविडोक्तिभ्यां एकमेवोत्तरं वद ॥ 52 ॥
किं तृष्णेति - वारि - गीर्वाणभाषया जलं । द्राविडभाषया वारि; (வாரி) कङ्कतादिना परिष्कृत्येत्यर्थः ।

सर्वप्राणिषु धीः कस्मिन् को वा मेषहरो मृगः ।
गीर्वाणद्राविडोक्तिभ्यां एकमेवोत्तरं वद ॥ 53 ॥
सर्वेति - भूमिस्थेषु नर-पशु-मृगादि-प्राणिषु विवेकरूपा धीः कुत्र ?
नरि-मनुष्य इत्यर्थः । द्राविड्या तु नरि (நரி) जम्बुक इत्यर्थः ।

आह्वयेत् यस्य पर्यायः कः कुत्र वलयस्थितिः ।
कर्नाटसंस्कृतोक्तिभ्यां एकमेवोत्तरं वद ॥ 54 ॥
आह्वयेति - कर्नाटभाषायां आह्वयेत्यर्थे करे इति शब्दः प्रयुज्यते । कङ्कणधारणं - करे -हस्ते ।

किमाचरति भृत्यः किं पञ्चमर्तौ तु बाधते ।
आन्ध्रद्राविडभाषाभ्यां एकमेवोत्तरं वद ॥ 55 ॥
किमिति-आन्ध्रभाषायां ''पनि'' कृत्यं इत्यर्थः । द्राविड्यान्तु ''पनि'' हिममित्यर्थः
एवं एकस्यैव पदस्य भाषाद्वयेन उत्तरद्वयरूपत्वात् इदं भाषाद्वयोत्तरम् ।

## नवमप्रकरणम् - प्रतिलोमानुलोमोत्तरम्

कीदृशी विपिनाळिस्तु गायकाळिश्च कीदृशी ।
प्रतिलोमानुलोमाभ्याम् एकेनैव वदोत्तरम् ॥ 56 ॥
कीदृशीति-ताळरसा इत्युत्तरम् । प्रथम प्रश्नस्य सारलतेति प्रातिलोम्येन द्वितीयस्यानुलोमेन ।

मूर्ध्नि का धार्यते केशरम्यतां च ददति कः ।
प्रतिलोमानुलोमाभ्याम् एकेनैव वदोत्तरम् ॥ 57 ॥
मूर्ध्नीति - कालिमा इत्युत्तरम् । ळलयोरभेदः ज्ञेयः ।

केनाऽञ्जनातनयतामभजद्धनूमान् को मानवो युवतिसङ्गमपेक्षते कः ।
वक्तव्यमेकमनुलोमत उत्तरं स्यात् विद्वद्भिरुत्तरयुगं प्रतिलोमतस्तु ॥ 58 ॥
केनेति-वायुना इत्युत्तरम् । ना युवा प्रातिलोम्येन उत्तरद्वयं वाच्यम् ।

केकिसन्तोषहेतुः का रुद्रपत्न्यपि वाऽथ का ।
प्रतिलोमानुलोमाभ्यां एकरूपैवतां वद ॥ 59 ॥
केकीति-कालिका इत्युत्तरम् । प्रश्नद्वयस्याऽति प्रतिलोमानुलोमाभ्याम् एकरूपमेवेति बोध्यम् ।(मेघजाले च काळिका इत्यमरः)

वैवस्तपुरी सा तु कीदृशी पण्डितोत्तम ।
प्रतिलोमानुलोमाभ्याम् एकरूपं वदोत्तरम् ॥ 60 ॥
वैवस्वतेति-कालपालका इत्युत्तरं ज्ञेयम् ।

स्वासाधारणचिह्नस्य कथं सम्बोधनं हरेः ।
प्रतिलोमानुलोमाभ्याम् एकरूपं वदोत्तरम् ॥ 61 ॥
स्वासाधारणेति-कमलाललामक इत्युत्तरम् । कमला ललामं यस्य सः कमलाललामकः - भगवतः श्रीधरत्वस्यैवाऽसाधारणलक्षणत्वम् इति भावः (ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु इत्यमरः)

कविता कीदृशी रम्या पद्मसंबोधनं कथम् ।
प्रतिलोमानुलोमाभ्यां एकेनैव वदोत्तरे ॥ 62 ॥
कवितेति - सारसेति पदं प्रातिलोम्येन सरसा इति भूत्वा प्रथम प्रश्नस्य अत्तरम् । आनुलोम्येन तु सारसेति पद्मसंबोधनं वदतीत्यर्थः ।

## दशमप्रकरणं - सूत्रप्रश्नः

भरतेन विनीतेन चित्रकूटाभिधे शुभे ।
पर्वते ००००० श्चरणे कमलारुणे
पाणिनीयेन सूत्रेण पूरणीयं बुधोत्तमैः ॥ 63 ॥
भरतेनेति - "वन्दिते भ्रातुः" इति सूत्रमभिप्रेतम् ।

सौदामिन्यां ००० भवेत् स्थैर्यमौष्ण्यञ्च तोये
  शैत्यं तेजस्यतिमधुरता निम्बशाके कदाचित् ।
अम्भोजं खेप्यपि तु न घृणाघातुके जातुचित् स्यात्
  पूर्णः कार्यः प्रथमचरणः पाणिनीयात्तु सूत्रात् ॥ 64 ॥
सौदामिन्यामिति - वयसि च इति सूत्रमभिप्रेतम् ।

०००००० यथा तथा वा पुरुषस्तिष्ठतु तावदुत्तमे चेत् ।
  वयसित्वकृताघसाधुवृत्तः परमं पुरुषमेत्य मोदमीयात् ॥ 65 ॥
शून्यबिन्दुषट्कानन्तरं यथा तथेति । वयसि प्रथमे - इति सूत्रमभिप्रेतम् । उत्तमे चेत् वयसि साधुवृत्तः इति आप्त वाक्यमत्र प्रमाणतयाऽनुसन्धेयम् ।

कस्यां कवेः प्रथितता यमुनाग्रजः कः कस्मिन् नृणां तु विहिता नियमेन वृत्तिः ।
  प्रश्नत्रयस्य विदुषोत्तरदानमेक - सूत्रेण पाणिनिमुनेः क्रमशस्तु कार्यम् ॥ 66 ॥
कस्यामिति - वाचियमोव्रते इति सूत्रम् । वाचि यमः व्रते इति पदच्छेदेन प्रश्नत्रयोत्तरं भवतीति अर्थः ।

नरकः कस्यास्सूनुः के वा कुर्वन्ति दानमर्थिभ्यः ।
  पाणिनिसूत्रेणैकेनोत्तरयुग्मं सुधीभिरिह वाच्यम् ॥ 67 ॥
नरक इति - भुवः प्रभव इति सूत्रमभिप्रेतम् ।

यस्मिन् वर्णौ प्रथमचरमौ सङ्गतौ शासनार्थौ षष्ठं वर्णं यदि तु भजते यस्य वर्णस्तुरीयः ।
  सम्पूर्णेन्दुं वदति महितं पर्वकालप्रभेदं तत् किं सूत्रं वदत तरसा पाणिनीयं बुधेन्द्राः ॥ 68 ॥
यस्मिन्निति - ''आकडारादेकासंज्ञा'' इति सूत्रम् । (आज्ञा-राका)

यस्मिन् पाणिनिकल्पिते तु चरमो वर्णो विरिञ्चिं वद - त्यर्थ पक्षिण इत्यमुं वदति यन्मध्याक्षरं तेन चेत् ।
  आद्यं सङ्गतमक्षरं यदि रवेरित्यर्थबोधो भवेत् तत्सूत्रं वदताऽऽशु भो बुधवरास्साहित्यपारङ्गताः ॥ 69 ॥
यस्मिन् पाणिनीति - अवेः क इति सूत्रमभिप्रेतम् ।

०००० अनुद्दिश्य ००००० यो द्विजः ।
  ०००० करुणया प्रसीददति न संशयः ।
पाणिनीयैस्त्रिभिस्सूत्रैः पूरणीयं स्थलत्रयम् ॥ 70 ॥
शून्यबिन्दुचतुष्कानन्तरं - अनुद्दिश्येति - प्रयोजनं -धर्मं चरति - तस्येश्वर इति सूत्रत्रयं क्रमशः स्थानत्रये निवेश्यम् । निवेशे श्लोकार्थः स्पष्टः ।



पशुहिंसैकफलकान्यागान् ००० योऽविधि ।
००००००००० यो व्याधः का तयोर्भिदा ।
सूत्राभ्यां पाणिनीयाभ्यां पूरणीयं स्थलद्वयम् ॥ 71 ॥
पश्विति-चरति, पक्षिमत्स्यमृगान् हन्ति-इति सूत्रद्वयं शून्यस्थानद्वये निवेशनीयम् ।

पशुमार्जारपञ्चास्यतुरगान् पाणिनिर्मुनिः ।
बबन्ध केन सूत्रेण तत्सूत्रं किं बुनोत्तमाः ॥ 72 ॥
पश्निवति-गोबिडालसिंहसैन्धवेषूपमान इति सूत्रमित्यर्थः ।

यथा लोके भूयो विरचितमहागस्यपि सुते
०००० भूत्वा गळितनिजकोपस्तमवति ।
तथैवाऽस्मान्नित्यं रचितबहुमन्तूनपि तथा
जगन्मात्रा लक्ष्म्या शमितरूडसौ ००० हरिः ॥ 73 ॥
यथा लोक इति । पिता मात्रा रक्षति इति सूत्रद्वयं स्थलद्वये निवेशितं चेत् श्लोकार्थः स्पष्टः ।

यस्याऽऽद्यवर्णोऽन्तिमवर्णभाक् चेत् पीनं वदन्त्यादिमवर्णभाक् चेत् ।
अन्त्याक्षरं वक्ति हि दीर्घिकां तत् सूत्रं चतुर्वर्णमरं वदन्तु ॥ 74 ॥
यस्येति-''पीलायावा'' इति सूत्रंम् अभिप्रेतम् । तत्र आद्याक्षरम् अन्त्याक्षरेण योजितश्चेत् - पीवा इति भवति । अन्त्याक्षरम् आद्याक्षरेण योजितंचेत् वापीति भवति ।

स हि श्रोत्रिय इत्येतत् वाक्यं चेद्यदपेक्षते ।
तद्वाक्यं पाणिनीयैकसूत्ररूपमिहोच्यताम् ॥ 75 ॥
स हीति - सोममर्हति य इति सूत्रमभिप्रेतम् । यस्सोमपानमर्हति स एव हि श्रोत्रिय इत्यर्थः ।

## एकादशप्रकरणं - अव्यक्तवचनम् (புதிர்) (Riddle)

सिंहयुग्मान्तराळस्थं वस्तु लब्धुं विपश्चितः ।
यान्ति राजसभां ब्रूत किं तत् वस्तु बुधोत्तमाः ॥ 76 ॥
सिंहेति-तत् वस्तु कटकमित्यर्थः । मिथुनसिंहराशिमध्यस्थत्वात् कटकस्य - कटकशब्देनाऽत्र वलयम् उच्यते । वलयसन्मानार्थं विद्वांसः राजसभां यान्तीति अर्थः । सिंहद्वयमध्यस्थवस्तु लाभार्थं राजसभागमनं महासाहसम् असङ्गतं च पश्यतेत्यर्थान्तरमप्यवधेयम् ।

आद्याक्षरं भवेदाद्यं न पूर्वं मध्यमाक्षरम् ।
अन्तिमं भयमध्यस्थं स शब्दः कीदृशो वद ।
तन्न जानाति विद्वांश्चेत् अधमं तं वदाम्यहम् ।। 77 ।।

आद्येति - आद्याक्षरम् अकारः । न पूर्वं - नकारपूर्वाक्षरं धकारः तत् मध्यमाक्षरम् । अन्तिमाक्षरं तु भयमध्यस्थं - भकारयकारमध्यस्थः मकार इत्यर्थः । एवं च अधम इति फलितम् । एवं यो जानाति स श्रेष्ठः । नो चेत् अधम इत्यर्थः । विद्वानपि एवं न जानाति चेत् तं शब्दं अधमं इति अहम् एव वदामि इति अर्थान्तरमपि अवधेयम् ।

काचिद्वेश्या निजे गेहे धनिकं कञ्चिदागतं स्वानुजैर्मर्दयित्वा च हृत्वा तत्स्वं समस्तकम् ।
बहिः क्षिपति तं कूपे पातयत्यथवा बलात् सा च का केऽनुजास्तस्याः धनिकस्स च को वद ।। 78 ।।

काचिदिति-वेश्या-रसना, निजगेहं-वाक् धनिकः-रसवद्वस्तु, स्वानुजाः-दन्ताः । बहिः क्षिपति इक्षुखण्ड्यादिकं इति भावः । कूपे उदरे भक्ष्यादिकमित्यर्थः ।

यत्सनामाऽस्ति सेनाङ्गे भोग्यं स्यात्सकलं यतः ।
यन्नामास्त्यसुरः कश्चित् किं तत् वस्तु सखे वद ।। 79 ।।

यदिति-लवणम् इत्यर्थः । सनामा सैन्धव इत्यर्थः । सैन्धवशब्दस्याऽश्ववाचकत्वात् यन्नामासुरः लवणासुरः । (सेनाङ्गे-रथगजतुरग)

अन्तस्थाद्यन्तयोगे किं वा धान्यं भवेत् वद । ?
यो वा ऊष्मान्तिमान्तस्थद्वितीयाभ्यां भवेत् स कः ।। 80 ।।

अन्तस्थेति - यरलवाः अन्तस्थाः। तत्र आद्यन्ताक्षरयोगे यव इति धान्यभेदो भवतीत्यर्थः । शषसहाः ऊष्माणः । तदन्तिमहकारस्य अन्तस्थ - द्वितीयेन रेफेण योगे - हर इति भवतीत्यर्थः ।

पञ्चमप्रथमस्याऽपि तृतीयप्रथमस्य च ।
संयोगात् यत् भवेत् वस्तु तत् वस्तु त्वरितं वद ।। 81 ।।

पञ्चमेति-पञ्चमवर्गः पवर्गः तृतीयवर्गः टवर्गः ट वर्णः । तयोः आद्यक्षरसंयोगे पट इति भवति ।

श्रूयतामवधानेन पाकेन व्यञ्जनं भवेत् ।
कान्तया वार्तया किं स्यान्नाऽवजानासि चेदितः ।
मूढत्वं तव निर्णेतुं बहुबीजं वदाम्यहम् ।। 82 ।।

श्रूयतामिति-वार्ताकमित्यर्थः । तस्य पाकेन व्यञ्जनतया परिणामात् वार्तायाः कवर्णान्तत्वे वार्ताकेति पर्यवसानात् च इत्थमुक्तेऽति न जानासि चेत् तव मूढत्वं निश्चेतुं बहुकारणं वदामि इत्येकोर्थः । त्वं न जानासि चेत् तत् वस्तु बहुबीजमिति व्यक्तं वदामि इत्यर्थान्तरम् ।

कण्ठे गरस्य सम्बन्धे भवस्स्याद्युक्तमेव तत् ।
करेणोः करिसंयोगे कथं रावण इत्यहो ॥ 83 ॥

कण्ठ इति-कटपयादिसंख्यया कण्ठशब्दात् एकविंशति संख्या लब्धा । गरशब्दात् त्रयोविंशति संख्या तदुभयसम्बन्धे चतुश्चत्वारिंशत् संख्या (21+23=44) । सैव भव (44) शब्देनोच्यते । करेणु शब्दात् एकविंशत्युत्तरपञ्चशतं संख्या (521) करिशब्देन एकविंशति संख्या (21) उभयमेळने (521+21=542) द्विचत्वारिंशदुत्तरपञ्चशत संख्या भवति । सैव रावण शब्देनोच्यते । अयमेव श्लोकाभिप्रेतार्थः । कण्ठे विषसम्बन्धे रुद्र इति तु युक्तम् । करेणुकरि संयोगे रावणो जात इति तु आश्चर्यम् इत्यपातार्थ स्पष्ट एव ।

वासाद् दीपापहारे तु तमस्स्यादुचितं हि तत् ।
धरण्यान्दीपलोपेऽपि प्रकाशोभवदत्भुतम् ॥ 84 ॥

वासादिति-चतुस्सप्ततिसंख्यायाम् दीपापहारे अष्टादशापहारे षट् पञ्चाशत् तमश्शब्देनोच्यते (74-18=56) धरण्या-एकोनत्रिंशदुत्तर पञ्चशतसंख्यायां दीपलोपे - अष्टादशसंख्यालोपे एकादशोत्तर पञ्चशतसंख्या (529-18=511) सैव प्रकाशशब्देनोच्यत इत्यभिप्रेतार्थः । विरोधस्फोरकापातार्थस्तु स्पष्ट एव ।

मरुतां पाण्डवैर्योगे कथम् आदित्यसम्भवः ।
प्रजापतीनां प्रद्युम्नबाणैस्तु मनवोऽभवन् ॥ 85 ॥

मरुतामिति । मरूछब्देन सप्तसंख्या, पाण्डवशब्देन पञ्चत्व संख्या, तदुभयमेळने द्वादश-आदित्यशब्देनोच्यते । तादृशसंख्या प्रजापतिशब्देन नवत्वसंख्या, मन्मथबाणाः पञ्च तन्मेळने चतुर्दश-तत्संख्या मनुशब्देनोच्यते । मनूनां तत् संख्यात्वात् ।

पुरुषार्थप्रहाणेन रुद्राश्च कुलपर्वताः ।
प्रजापतीनां वेदापहारे युक्तं हि पातकम् ॥ 86 ॥

पुरुषेति - रुद्रशब्देन एकादशत्वसंख्या - तत्र पुरुषार्थशब्दाभिप्रेतचतुष्ट्वसंख्यापहारे सप्तत्वतत्संख्या (11-4=7) कुलपर्वतशब्देनोच्यते । पातकशब्देन पञ्चत्वसंख्या शिष्टं स्पष्टम् । आपातप्रतीतोर्थः स्पष्टः ।

द्वितीयकुसुमं भाति पञ्चमेऽद्य तृतीयवत् ।
मन्दं मन्दं चतुर्थोऽति सञ्चरत्यन्तिके मम ।
लब्ध्वावकाशं यतते बाधितुं पञ्चमोपरः ।
नायको मे न चाऽयाति सखि किं करवाण्यहम् ॥ 87 ॥

द्वितीयेति - पञ्चभूतेषु द्वितीयं जलम् । तत्कुसुमं चन्द्र इत्यर्थः चन्द्रमा वा अपां पुष्पम् इति श्रुतेः । पञ्चमे-आकाशे । तृतीयवत् - अग्निवत् । चुतुर्थः वायुः अपरः पञ्चमः कोकिलशब्दः । शिष्टं स्पष्टं - विरहिणीवचनमेतत् ।

कस्मिंश्चिन्मण्टपे काचघटौ रक्तसितौ स्थितौ ।
तौ तु स्वकर्तृसामर्थ्यात् अन्तर्दीपं विनाऽपि च ॥
नितरां भवतस्तस्य मण्टपस्य प्रकाशकौ ॥ 88 ॥
कस्मिन्निति - रक्तसितौ काच घटौ - सूर्यचन्द्रौ । मण्टपशब्देन आकाश उच्यते । प्रसिद्धौ तु काचघटौ स्ववृत्तिदीपद्वारैव प्रकाशकौ - इमौ तु विलक्षणावित्यर्थः ।

श्रूयतां घातुकः कश्चित् मातृहस्ततलस्थितम् ।
आयुधं किञ्चिदादाय तेन हन्त्यखिलाः प्रजाः ॥ 89 ॥
श्रूयतामिति - मन्मथ इत्यर्थः । लक्ष्म्या अरविन्दहस्तत्वात् अरविन्दस्य मन्मथबाणत्वात् तेन सर्वान् हन्तीति अर्थः ।

अनेकवृषभा एकरज्जुबन्धाननूचितम् ।
किन्तु तेन चलन्त्येव रज्जुस्सरति विस्मयः ॥ 90 ॥
अनेकेति-कूश्माण्डवल्लीत्यर्थः । वृषभशब्देन कूश्माण्डफलानुच्यते । रज्जुशब्देन तद्वल्ली । शिष्टं स्पष्टम् ।

कांचित् बालां निजोत्सङ्गे शाययित्वा स्वपाणिना ।
काचित् लालयति प्रीत्या सा रोदिति सगद्गदम् ॥
कोपेन सा पुनः कर्णे तां पीडयति बालिकाम् ।
करोति कृपया भूयः पुनरप्युपलालनम् ॥
तथाऽति सात्मनस्त्वेककुचत्वादिव रोदिति ।
बालिका का कुचस्तस्याः कः कर्णश्च सखे वद ॥ 91 ॥
कर्णपीडनं-स्वरपरिष्कारः (பிரடையை முடுக்குவது ஸ்ருதி சேர்பதற்காக) स्तनशब्देन तुम्बिकाफलं (சுரக்காய் குடம்) उच्यते । रोदनं - गानं, सगद्गदरोदनं - असदृशस्वरः । शिष्टं स्पष्टम् ।
(Playing of Veena instrument described)

श्रूयतां पार्थिवः कश्चित् प्रत्यहं प्रातरादरात् ।
ददाति राजतं पिण्डं नारीहस्ते सखे वद ॥ 92 ॥
श्रूयतामिति - पर्थिवशब्देन मृण्मयी दधि पात्रमुच्यते । राजतपिण्ड-शब्देन नवनीतमुच्यते । प्रत्यहं प्रातः काले स्त्रियः दधिमथनेन नवनीतं गृह्णन्तीति अयमर्थः एवम् उच्यते ।

नीलाकारास्तु मणयः कस्मिंश्चित् तु समुद्गके ।
द्रष्टा मया समस्तास्ते वज्रशीर्षास्सखे वद ॥ 93 ॥
नीलेति - माषा इत्यर्थः । श्वेतशिरस्कत्वात् तेषां वज्रशीर्षत्त्वं, समुद्गकशब्देन माषपूर्णतत्फलमुच्यते ।



चतुराननयोर्मध्ये नकारो यस्य वर्तते ।
तत् किं वस्तु सखे तत्ते दास्यामि यदि वक्ष्यसि ॥ 94 ॥
चतुरिति-कनकं इत्यर्थः । ककारस्य चतुरानन वाचकत्वात् ।

हंसः कश्चिदपादस्सन् केनचित् पाणिना धृतः ।
मुहुस्तदधरं पीत्वा पुनरेति करं स कः ॥ 95 ॥
हंस इति-शङ्ख इत्यर्थः। अधरे कृत्वा शङ्खस्य वादनात् तदधरपानमिति उच्यते । पाण्डरत्वात् हंस इत्युक्तः ।

सुन्दरः पुरुषः कश्चित् आस्ते सर्वास्स्त्रियो वपुः ।
अलङ्कृत्य स्वकं तस्मै दर्शयित्वा पुनस्तु तम् ॥
तोषयित्वा ततो भर्तृसमीपं यान्त्य स कः ॥ 96 ॥
सुन्दर इति-दर्पण इत्यर्थः । श्लक्षणत्वात् सुन्दर इत्युक्तम् । स्त्रियः स्वदेहं अलंकृत्य दर्पणे आलोक्य अलङ्कारन्यूनतायांसत्यां पुनस्सम्यक् अलङ्कृत्य दर्पणे पुनरवलोकने मनस्समाधाने सति एव भर्तुसमीपगमनात् तत्सन्तोषणपूर्वकमेव भर्तुसमीपगमनमित्युक्तमिति ज्ञेयम् ।

कश्चिदस्ति हरस्तस्य शिखाशीर्षेस्ति नो जटा ।
गङ्गा न मस्तके किन्तु जठरेस्ति सखे स कः ॥ 97 ॥
कश्चिदिति - नाळिकेरफलमित्यर्थः । त्रिनयनत्वात् हर इति ।

काचिदस्त्यप्सरा भूमौ तस्या एकैव पुत्रिका ।
पुत्रिकायास्तु वेण्येका कुच एकस्तदग्रगः ॥
वृद्धिमेति सचित्रं सा का सखे त्वरितं वद ॥ 98 ॥
काचिदिति-मोचा इत्यर्थः । रम्भानामकत्वात् अप्सरा इत्युक्तम् । सकृदेव फलप्रदानात् एकपुत्रिकेति । वेणीशब्देन पुच्छाकार तद्व्रातम् । कुचशब्देन तत्कुसुममुच्यते ।

चित्रं कस्यचिदैन्द्रजालिकनरस्योद्योगतः पादपे
कस्मिश्चित् कुसुमं फलत्यतिजवात् तच्चाऽति सद्यः क्षणात् ।
वृद्धिं प्राप्य बृहत्तरं भवगतः क्षिप्रञ्च पक्वं भवत्
तस्मात् भूमिरुहात् पतत्ययि सखे वृक्षस्स कः किं फलम् ॥ 99 ॥
चित्रमिति-कुलालेन मृतपिण्डश्चक्रे आरोप्य चीवरादिव्यापारेण शीघ्रं कपाल-घट-शरावादि परिणामं प्रापय्य चक्रात् अवरोप्यत इति अयमर्थमुच्यते ।

क्षेत्रे तु कुत्रचन बीजचयः प्रकीर्णः नादातुमीषदपि पाणितलेन शक्यः ।
वाचा तु यद्यपि भवेत् बहुशोप्यनेकैः नीतोऽपि तत्र स तु पूर्ववदक्षयस्स्यात् ॥ 100 ॥

क्षेत्र इति-पत्रिकायां लिखितः अक्षरगणःबीजचय इत्युच्यते । वाचा आदानन्मामपठनं * । शिष्टं स्पष्टम् । एवं तत्तत्द्वस्तूनां व्यक्ततया अनुक्त्वाप्रकारान्तरेण कथनात् अव्यक्तवचनं - इदं द्रविडभाषया पुदिर् (புதிர்) (इति भवति) [ * आदानन् नाम पठनं ]

## द्वादशप्रकरणं - अक्षरविन्यासरसम्

केशो वराहवत् भाति तिलवत् भाति तेऽक्षिकम् ।
कटवत् करयोर्युग्मं कुचः कोलवदेधते ॥
वलग्नं त्वंशुवत् भाति बाले तेऽङ्गक्रमोऽद्भुतम् ।
तथाऽपि सर्वं रम्यं स्यात् कान्तता तत्रतत्र चेत् ॥ 101 ॥

केश इति-वलाहकवत् भाति । तिलकवत्-तिलकाश्रयम् इत्यर्थः । कटकवत् । कोरकवत् । अंशुकवत् । इत्थं ककारं अन्ते संयोज्य पठने सर्व सङ्गतं भवति । तदेवोक्तं कान्तता तत्र तत्र चेत् सर्वं रम्यं स्यादिति ।

बहुवाद्यलयै राजत्करा कान्ततिलानना ।
अनाद्याहारसंयुक्ता विपरीतकपिस्वरा ॥ 102 ॥

बह्विति - लयान्त्यवकाराद्यत्वे वलय इति भवति । तिलस्य कवर्णान्तित्वे तिलकमिति भवति । आहारशब्दस्य अनादित्वेआकार-रूपाद्यक्षरराहित्ये हार इति भवति । कपिशब्दस्य विपरीतत्वे पिक इति भवति । एवञ्च श्लोकार्थस्स्पष्टः ।

ऋजुबुद्धिस्सखे नारी काऽपि नाऽलक्ष्यते कथम् ।
मुख्याह्यलंकृतिस्स्त्रीणां अनादिः कपटः खलु ॥ 103 ॥

ऋज्विति-स्त्रीणां कपटः अनादिः- आजानसिद्ध इत्येकोर्थः । कपटशब्दस्य ककाररूपादिवर्ण - राहित्ये पट इति भवति । स मुख्यालङ्कार इति अन्यः अर्थः वस्त्रमुख्यत्वात् अलङ्कारस्य ।

विराटो गाणिकासङ्गी राक्षसप्रीतिरच्युतः ।
श्लाघ्यते दासता लोके भावं वद सखे द्रुतम् ॥
मध्ये राक्षससंसर्गात् अनर्थो हि सतामपि ।
राक्षसापगमस्स्यात् चेत् सुलभो ह्यर्थनिश्चयः ॥ 104 ॥

विराट इति - 'रा' इति मध्याक्षरापगमे विट इति भवति । राक्षस इत्यत्र 'क्ष' इति वर्णापगमे रास इति



भवति । रासप्रीतिः नाम रासक्रीडा-प्रीतिरित्यर्थ; । दासता इत्यत्र 'स' वर्णापगमे दाता इति भवति । एवञ्च श्लोकार्थः सम्यक् अन्वितो भवति । अत एवोक्तं मध्ये रा-क्ष-स संसर्गात् सतामप्यनर्थ इति । रा-क्ष-स अपगमः स्यात् चेत् अर्थनिश्चयः सुलभ इति च । अर्थान्तरन्तु स्पष्टमेव ।

करालश्श्लाध्यतामेति धीवरा यान्ति पूज्यताम् ।
राजानः कुणपा लोके न लभेदर्थमार्जवात् ॥
मध्ये रावण सन्यासे कृतेऽर्थः प्राप्यते ध्रुवम् ॥ 105 ॥

कराळ इति-पूर्ववत् एव मध्याक्षरपरित्यागे-कळः, धीरः, कुपा इति भवति । एवं च श्लोकार्थः स्पष्टः । कळः मधुरस्वरः । आर्जवात् यथा श्रुतपदात् अर्थो न लभ्यते । किन्तु मध्ये रा-व-ण सन्यासे - त्यागे कृत एवेति प्रकृतार्थः । कालवैषम्यात् आर्जवेन धनलाभो न शक्यः । किन्तु वञ्चनायां सत्यामेवेत्यर्थान्तरम् अवधेयम् । रावणसन्यास शब्देन वञ्चनोच्यते । (कु-भूमिः, कुपाः-भूपाः- कुणपः शवमस्त्रियाम् इति अमरः)

चारं निहतवान् कृष्णः स्वरे राजा तु पूज्यते ।
नादो वीणां नादयति भावं वद सखे द्रुतम् ॥
पदान्तर्नूपुरन्यासे नारीवत् रम्यतां व्रजेत् ॥ 106 ॥

चारमिति-मध्ये 'णू' इत्यक्षरन्यासे चाणूर इति भवति । स्वरे इत्यत्र मध्ये 'पु' इति निवेशे स्वपुरे इति भवति । नाद इत्यत्र मध्ये 'र' इति निवेशे नारद इति भवति । अत एवोक्तं पदान्तर्नूपुरन्यासे नारीवत् रम्यतां व्रजेत् इति ।

न बद्धस्सेतुरम्भोधौ भरतो नैव मोक्षभाक् ।
नृषु कोपादरो नास्ति श्लोकार्थः कीदृशस्सखे ॥
अन्तर्लवण निक्षेप तक्रवद्रस्यतां व्रजेत् ॥ 107 ॥

नेति-मध्ये ल-व-ण इत्यक्षरत्रयस्य क्रमेण निवेशे सति नलबद्धः- भवरतः - कोणपादर इति भवति । यथा तक्रस्य लवणनिक्षेपे रस्यत्वं तद्वत् अत्रेति भावः । (कोणपः= कौणपः- राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशर इति अमरः )

कपिकाळिनादमधुरा वनावळिः कमलक्षयेन मधुरं सरोजलम् ।
कविराजमाप गमनार्थमच्युतः कविरामभद्ररचितं भवेदिदम् ॥ 108 ॥

कपीति - कविरामभद्ररचितं भवेत् - ककारविरामे सति भद्रत्वेन रचितं सङ्गतार्थमित्यर्थः । यथा पिकाळिनादमकधुरा, मलक्षयेन विराजं - गरूडं - इत्यर्थः । इदं चित्रं कवि रामभद्रेण रचितमित्यपि अवधेयम् ।